# rAhustotram

# રાહુસ્તોત્રમ્

## Document Information

Text title : rAhustotram

File name : rAhustotram.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran psawaswaran

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# રાહુસ્તોત્રમ્

ॐ નમો રાહવે ।
નમસ્તે દૈત્યરૂપાય દેવારિં પ્રણમામ્યહમ્ ।
નમસ્તે સર્વભક્ષ્યાય ઘોરરૂપાય વૈ નમઃ ॥ ૧॥

ત્વં બ્રહ્મા વરુણો દેવસ્ત્વં વિષ્ણુસ્ત્વં હરિઃ શિવઃ ।
મર્ત્યલોકે ભવાન્પ્રીતઃ સંસારજનતારકઃ ॥ ૨॥

કૂટપર્વતદુર્ગાણિ નગરાણિ પુરાણિ ચ ।
યસ્ય ક્રોધવશાદ્ભસ્મીભવન્તિ ક્ષણમાત્રકમ્ ॥ ૩॥

ધૂમ્રવર્ણો ભવાન્ રાહૂ રક્તાક્ષઃ પિઙ્ગલોપમઃ ।
ક્રૂરગ્રહસ્તથા ભીમો યમરૂપો મહાબલઃ ॥ ૪॥

યસ્ય સ્થાને પઞ્ચમેઽપિ ષષ્ઠે ચૈવ તૃતીયકે ।
દશમૈકાદશે ચૈવ તસ્ય શ્રેયઃ કરોત્યલમ્ ॥ ૫॥

અન્નં ખડ્ગં ચ યદ્દત્તં રાહવે સુફલપ્રદમ્ ।
પૃથિવ્યાં બ્રહ્મપીડાં ચ ગોપીડાં તન્નિવારયેત્ ॥ ૬॥

કૃમિકીટપતઙ્ગેષુ ચરન્તં સચરાચરમ્ ।
ગોદાનં ભૂમિદાનં ચ હ્યન્નં વસ્ત્રં ચ દાપયેત્ ॥ ૭॥

સૌવર્ણરૌપ્યદાનં ચ કન્યાદાનં ચ તત્ક્ષણાત્ ।
એતદ્દાનં ચ સમ્પૂર્ણં રાહુમોક્ષકરં નૃણામ્ ।
અસ્ય સ્તોત્રસ્ય માહાત્મ્યાદ્રાહુપીડા વિનશ્યતિ ॥ ૮॥

રક્તાક્ષો ધૂમ્રવર્ણાભો વિજિતારિર્મહાબલઃ ।
અબાહુશ્ચાન્તરિક્ષસ્થઃ સ રાહુઃ પ્રીયતાં મમ ॥ ૯॥

ઇતિ રાહુસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*rAhustotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*